## अध्ययनतोऽविप्रकृष्टाख्यानाम् । (५/९०९)

[1]अध्ययनेन निमित्तेन येषामविप्रकृष्टा प्रत्यासन्ना [2]आख्या, तेषां द्वन्द्वः एकवद् भवति । [3]पदकक्रमकम् । क्रमकवार्तिकम् । [4]सम्पाठः पदानां क्रमस्य च[5] प्रत्यासन्नः । [6]अध्ययनतः इति किम् ? पितापुत्रौ[7] । अविप्रकृष्टाख्यानाम् इति किम् ? याज्ञिकवैयाकरणौ ॥

## जातिरप्राणिनाम् । (६/९१०)

[8]जातिवाचिनां शब्दानां द्वन्द्व एकवद् भवति प्राणिनो वर्जयित्वा । [9]आराशस्त्रि । धानाशष्कुलि[10] । जातिः इति किम् ? नन्दकपाञ्चजन्यौ । अप्राणिनाम् इति किम् ? ब्राह्मणक्षत्रियविट्शूद्राः । [11]नञिवयुक्तन्यायेन (व्या. प. ६५) [12]द्रव्यजातीनामयमेकवद्भावः, न गुणक्रियाजातीनाम् । [13]रूपरसगन्धस्पर्शाः । गमनाकुञ्चनप्रसारणानि । [14]जातिपरत्वे च जातिशब्दानामयमेकवद्भावो [15]विधीयते, [16]न नियतद्रव्यविवक्षायाम्– [17]इह कुण्डे बदरामलकानि तिष्ठन्ति [18]इति ॥

## विशिष्टलिङ्गो नदी देशोऽग्रामाः । (७/९११)

[19]विशिष्टलिङ्गानां भिन्नलिङ्गानां नदीवाचिनां शब्दानां देशवाचिनां च ग्रामवर्जितानां[20] द्वन्द्व एकवद् भवति । नद्यवयवो द्वन्द्वो नदी इत्युच्यते । देशावयवश्च देशः[21] । नदी देशः इत्यसमासनिर्देश एवायम् । उद्ध्यश्च इरावती च [22]उद्धचेरावति । गङ्गाशोणम् । देशः खल्वपि – कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रम् । [23]कुरुकुरुजाङ्गलम्[24] । विशिष्टलिङ्गः इति किम् ? गङ्गायमुने । [25]मद्रकेकयाः । नदी देशः इति किम् ? कुक्कुटमयूर्यौ । अग्रामाः इति किम् ? जाम्बवश्च शालूकिनी च जाम्बवशालूकिन्यौ । नदीग्रहणमदेशत्वात् । जनपदो हि देशः । तथा च [26]पर्वतानां ग्रहणं न भवति, कैलासश्च [27]गन्धमादनं च कैलासगन्धमादने ।

[१५३] अग्रामा इत्यत्र [28]नगराणां प्रतिषेधो वक्तव्यः । (म. भा. १.४७४)

[29]इह मा भूत्, मथुरा च पाटलिपुत्रं च मथुरापाटलिपुत्रम् ।

[१५४] उभयतश्च ग्रामाणां प्रतिषेधो वक्तव्यः । (म. भा. १.४७४)

[30]सौर्यं च नगरं, [31]केतवतं च ग्रामः [32]सौर्यकेतवते ॥

---

1. अध्ययननिमित्तेन ड. 2. आख्याः इ. 3. पदक्रमकम् ह. 4. संपादानां फ, सम्पाठपदानाम् ड.इ. 5. न इत्यधिकम् इ. 6. वाक्यमिदं नास्ति फ. अध्ययने इ. 7. आढचदरिद्रौ इत्यधिकम् ड. इ. 8. अनेकव्यापारा जातिः इत्यधिकम् क, जातिः द्वन्द्वः इति गौणो निर्देशः । जात्यवयवो जातिः इति इत्यधिकम् ड. इ. 9. आराशस्त्री ह. 10. युगवस्त्रम् इत्यधिकम् क. ड. इ. 11. नञिव युक्त इति ड. 12. द्रव्यादीनाम् इ. फ. 13. रूपरसगन्धस्पर्शानाम्, गमनाकुञ्चनप्रसारणानाम् च क. ड. 14. जातिपरत्वे सति क. फ. ह, जातिपरत्वं च इ, जातिपरत्वे च शब्दानाम् ड. 15. विधीयते नास्ति ब. क. फ. ह. 16. न नास्ति इ. 17. तेन क, इह कुण्डे नास्ति ब. ड. इ. ह. 18. इति नास्ति ब. क. इ. ह. 19. नदीवाचिनां भिन्नलिङ्गानां विशिष्टवाचिनां देशवाचिनां च शब्दानां फ, विशिष्टलिङ्गानां नास्ति इ.ह, भिन्नलिङ्गानां नास्ति क. 20. च इत्यधिकम् फ. 21. इति इत्यधिकम् क. ड. 22. उद्धचेरावती ड. फ. 23. कुरुजाङ्गलम् ब. ड. ह. 24. दार्वाभिसारम्, काश्मीरातिसारम् इत्यधिकम् ड. इ. 25. मुद्रकेकयाः क. 26. पर्वतादीनां भवति इ, ग्रहणं नास्ति ड. 27. गन्धमादनः फ. 28. नगरप्रतिषेधो क. इ. फ. ह. 29. वाक्यमिदं नास्ति फ. 30. शौर्यं ब. ड, गौर्यं ह. 31. केतवं च ब, केतवनं इ. ड. ह, कैतवती फ, केतवता क. 32. सौर्यकेतवने ड. इ.